श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री कृष्णब्रह्मतन्त्र परकालस्वामि अनुगृहीता

# ॥ अलङ्करणमालिकास्तुतिः ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ अलङ्करणमालिकास्तुतिः ॥

कमलवनावलिभोग्यं कलशपयोराशिराजसौभाग्यम्।
किमपि हयाननभाग्यं कलयतु मां स्वगुणविनुतिकृतियोग्यम्॥ १ ॥

हरणायाखिलविपदां करणान्येकादशापि विनियम्य।
श्लोकैरेकादशभिः लोकेशित्रीं स्तुवे प्रसीदतु सा॥ २ ॥

अंबवधूमणि भवतीम् अम्बुरुहाक्षोऽपि वक्षसि बिभर्ति।
किंबहुनाऽखिलजगतां त्वं बहुमान्या सुधाम्बुनिधिकन्या॥ ३ ॥

निरुपमवरतमसुगुणाङ्कुरनिकुरुंबालवालभूतां त्वाम्।
तुरगवदनस्य तरुणीं तरुणाम्बुजलोचनां श्रये शरणम्॥ ४ ॥

शुभदायकौलवणिमप्रभावौ ननु जननि तव विदितविभवौ।
पादौ वितीर्णमोदौ श्रीदौ स्यातां ममाब्जदायादौ॥ ५ ॥

हरिदर्शनसविकसनं हारि ममामोदिषट्पदोल्लसनम्।
हृदयाम्बुजं शरण्याहयमुखदायितैतुललितलावण्या॥ ६ ॥

शिशिरमयूखावरजं वसितहयग्रीवममृतसागरजम्।
भजतां भवभरतापं नयतां नः किमपि धाम तल्लोकम्॥ ७ ॥

कञ्चिद्वणिग्जन इव न्यासधनी मौग्ध्यमम्ब तव वीक्ष्य।
त्वयि विक्रीयाणुतमं स्वमहो लभते महाविभूतिं त्वत्॥ ८ ॥

भुवनावनतिर्निद्रा सवनाशननाथकृतनुतिकृपार्द्रा।
धुवतात्काचिन्मुद्रा भवतापं भव्यदायिनी भद्रा॥ ९ ॥

शकुनि ध्वजाविभाज्यं सकलं तत्किमपि तस्य साम्राज्यम्।
दत्तां विभवं प्राज्यं तत्तादृशमखिलविबुधपरिपूज्यम्॥ १० ॥

www.prapatti.com

सुचतुरमतिरपि यस्ते नचरणकमलद्वयीं नमेज्जातु।
अचतुष्पात्खर एव स न च विशयोऽत्रास्ति वचननिचयैः॥ ११ ॥

नागवरभोगवाहौ रागवती भगवतीह वागीशे।
द्रागवतात्प्रचुरभवोद्वेगवतोऽस्मान्कृपाझरी काऽपि॥ १२ ॥

भवभरतपर्तुतापा भवन्ति तेऽमी चिरं न साटोपाः।
कमलापाङ्गामानसके किंस्तुघ्नंत्यमून् घनस्मेराः॥ १३ ॥

कल्याणगुणस्यूतां कान्त्याश्लेषेण सन्ततं स्फीताम्।
तनुतां हृद्यां जगतां माताऽलङ्करणमालिकामेताम्॥ १४ ॥

एषा महिशूरेश्वरकृष्णक्ष्मापालरत्नवंशगुरोः।
उदिता कृतिर्विजयतां श्रीकृष्णब्रह्मतन्त्रपरकालात्॥ १५ ॥

॥ इति अलङ्करणमालिकास्तुतिः समाप्ता ॥



www.prapatti.com